This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection


कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र M169 विषय व्याकरण
नाव. सिद्धान्त पूर्वार्ध ms
लेखक/लिपीकार —
पृष्ठ 36 काळ — पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथनैरुक्तपूर्वषट्कारंभः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ १॥

श्रीगणेशायनमः॥ हरिः ओम्॥ समाम्नायः समाम्नातः व्याख्यातव्यस्तमिमं
समाम्नायं निघंटव इत्याचक्षते निघंटवः कस्मान्निगमाइमे भवंति छंदोभ्यः
समाहृत्यसमाहृत्यसमाम्नातास्तेनिगंतव एवसंतो निगमनान्निघंटव उच्यंत
इत्योपमन्यवो विवाहननादेवस्युः समाहृताभवंतियद्वासमाहृताभवंतितयान्येता
निचत्वारिपदजातानि नामाख्याते चोपसर्गनिपाताश्चैतानीमानिभवंतितत्रैत
न्नामाख्यातयोर्लक्षणंप्रदिशंतिभावप्रधानमाख्यातं सत्वप्रधानानिना
मानितयत्रोभेभावप्रधानेभवतः पूर्वापूरीभूतं भावमाख्यातेनाचष्टेजनिपच्यती
त्युपक्रमप्रभृत्यपवर्गपर्यंतंमूर्तेसत्वभूतंसत्वनामभिर्व्याप्तिक्रियादृतिसत्वा
नामुपदेशो गौरश्वः पुरुषोहस्तीतिभवतीतिभावस्यास्तेशेतेव्रजतितिष्ठतीतीं ॥ १॥

ष्टियनिसंवचनमौडुंबरायणः॥ १ ॥तत्रचतुष्टयंनोपपद्यतेयुगपदुत्पन्नानांवा
शब्दानामितरेतरोपदेशः शास्त्रकृतोयोगश्चव्याप्तिमत्वात्तुशब्दस्याणीयस्त्वा
च्चशब्देनसंज्ञाकरणंव्यवहारार्थंलोकेतेषांमनुष्यवद्देवताभिधानंपुरुषविधा
नित्यत्वात्कर्मसंपत्तिर्मंत्रोवेदेषड्भावविकाराभवंतीतिवार्ष्यायणिर्जायतेस्तिवि
परिणमतेवर्धतेपक्षीयतेविनश्यतीतिजायतइतिपूर्वभावस्यादिमाचष्टेनापरभा
वमाचष्टेनप्रतिषेधत्यस्तीत्युत्पन्नस्यसत्वस्यावधारणंविपरिणमतइत्यन्यव
मानस्यतत्तद्विकारंवर्धतइतिस्वांगाभ्युच्चयंसांयोगिकानांवार्थानांवर्धतिविज्ञा
येनेतिवावर्धतेशरीरेणेतिवापक्षीयतइत्येतेनैवव्याख्यातः प्रतिलोमंविनश्यतीत्य
परभावस्यादिमाचष्टेनपूर्वंभावमाचष्टेनप्रतिषेधति॥ २ ॥अतोन्येभावविका
रा एतेषामवविकाराभवंतीतिहस्माहतेयथावचनमभ्यूहितव्या ननिर्बद्धाउपस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गीअर्थोनिराकुरितिशाकटायनोनामाख्यातयोस्तुकर्मोपसंयोगद्योतकाभ
वंत्युच्चावचाःपदार्थाभवंतीतिगार्ग्यस्तद्यएषुपदार्थेःप्राकुरिमेतन्नामाख्या
तयोरर्थविकरणमाख्यर्वागर्थंप्रयुज्येतस्यप्रातिलोम्यमभीत्याभिमुख्यंप्रतीत्ये
तस्यप्रातिलोम्यमतिमुख्यभिपूजितार्थेनिर्दिश्येतयोःप्रातिलोम्यंन्यवेति
विनिग्रहार्थीयाउदित्येतयोःप्रातिलोम्यंसमित्येकीभावंव्यपेत्येतस्यप्रातिलो
म्यमन्वितिसादृश्यापरभावमपीतिसंसर्गमुपेत्युपजनंपरीतिसर्वतोभावमधी
त्युपरिभावमैश्वर्यंवैवमुच्चावचानर्थान्प्राकुरुतउपेक्षितव्याः॥ २ ॥अथनिपा
तउच्चावचेष्वर्थेषुनिपतंत्युपमार्थेपिकर्मोपसंग्रहार्थेपिपदपूरणासंधा
मेतेचत्वारउपमार्थेभवंतीवेतिभाषायांचान्वध्यायंवाग्निरिवेंद्रइवेतिनेतिप्र ॥ २ ॥

तिषेधार्थीयोभाषायामुभयमन्वध्यायन्निंद्रंदेवममंसतेतिप्रतिषेधार्थीयःपुर
स्तादुपचारस्तस्ययत्प्रतिषेधतिउभयंसोनसुरायामित्युपमार्थीयउपरिष्टा
दुपचारस्तस्ययेनोपमिमीतेचिदित्येषानेककर्मोपचार्यश्चिदिदंब्रूयादितिपू
जायामाचार्यःकस्मादाचार्यआचारंग्राहयत्याचिनोत्यर्थानाचिनोतिबुद्धि
मितिवादधिचिदित्युपमार्थेकुल्माषांश्चिदाहरत्यवकुत्सितेकुल्माषाःकुले
षुमीदंतिनुइत्येषानेककर्मेदंनुकरिष्यतीतिहेत्वपदेशेकथंनुकरिष्यतीत्य
नुपृष्टेनन्वेतदकार्षीदितिचाथोपमार्थेभवति॥ दक्षस्यनुतेपुरुहूतयुज्याः॥
वृक्षस्येवतेपुरुहूतशाखायाःशाखावेतेवोतायनाभवंतिशाखाःस्वशायाः
शक्नोतेर्वाथयस्यागमादर्थेपथक्त्वमहविज्ञायतेनलोहेशिकमिवविग्रहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णपथब्काल्सकर्मोपसंग्रहश्चेतिसमुच्चयार्थउभाभ्यांसंप्रयुज्यतेहंच
लंचवत्रहंन्नित्यत्रसिंनेवार्थेदेवेभ्यश्चपितृभ्यएत्याकारोवर्तिविचा
रणार्थेहेताहंपृथिवीमिमांनिदधानीहवेहवेत्यथापिसमुच्चयार्थस
वति॥७॥वायुर्वात्वामनुवात्वेति॥अहइतिचहइतिचविनियहार्थी
योपूर्वेणसंप्रयुज्येतेन्त्रयमेहंकरोत्वयमिदमिदंहकरिष्यतीदंन
करिष्यतीत्यथाप्युकारएतस्मिंनेवार्थेउत्तरेणमंत्रेमवदंतिसत्यमु
तेवदंतीत्यथापिपदपूरणइदमुनुदुहीत्येषेनेककर्मेदंहिकरिष्यतीति ॥ राम ॥
हत्वपदंशेकथंहिकरिष्यतीत्यनुयुंक्तेकथंहिव्याकरिष्यतीत्यसूयायांकि ॥ ३ ॥
लेतिविधात्रकर्षएवंकिलेसथापिननुइत्येताभ्यांसंप्रयुज्यतेनुपृच्छन

किलेवंननुकिलेवंमतिप्रतिषेधेमाकार्षीर्माहार्षीरितिचरवल्विनिचरवलुरूला
रवलुरूतमथापिपदपूरणएवंरवलुतदूभूवंतिशश्वदितिविचिकित्सार्थीयो
भाषायांशश्वेदवमित्यनुयुंक्तेएवंशश्वदित्यस्वयंपृच्छेन्ननमितिविचिकित्सा
र्थीयोभाषायामुभयमन्वध्यायंतिविचिकित्सार्थीयश्चपदपूरणश्चागस्यइं
द्रायहविर्निरूप्यमरुद्भ्यःसंप्रादित्सांचकारसइंद्रएत्यपरिदेवयांचक्रे॥ ५॥
ननूनमस्तिनोश्वःकस्तेहृदयदद्रुतं॥अन्यस्यचित्तमभिसंचरेण्यमुना
धीनंविनश्यति॥ननूनमस्यद्यतनंनोएवश्वस्तनमद्यास्मिन्यविद्युरि
त्यक्षोनामधेयंद्योततइतिसतःश्वउपाशंसनीयःकालोह्योहीनःकालः॥
कस्तेहृदयदद्रुतं॥कस्तेहृदयदग्धृतमिदमपीतरंदद्रुतमभूतमिवान्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ नि० प० ॥ स्यचित्तमभिसंचरेण्यमभिसंचार्यन्योनानेयश्चित्तंचेततेरुता धीतंविन
॥ ४ ॥ श्यतीत्यप्याध्यातंविनश्यत्याध्यातमभिप्रेतमथापिपदपूरणः॥ ६ ॥
नूनंसातेग्नेवरंजरित्रेदुहीयदिंद्रदक्षिणामघोनी॥शिक्षास्तोत्रेभ्यामा
निधक्ष्मगोनाबृहद्वदेमविदथेसुवीराः॥ सातेग्नेदुधांवरंजरित्रेवरा
वरायतव्योषवतिजरितागरितादक्षिणामघोनीमघवतीमघमितिध
ननामधेयंमहेलदानकर्मणोदक्षिणादक्षतेःसमर्धयतिकर्मणोव्यृद्धं
समर्द्धयतीत्यपिवाग्रदक्षिणागमनाद्दिशमभिप्रेत्यैदिग्घृस्तग्रहनिदं
क्षिणेहस्तादक्षतेरुत्साहकर्मणोदाशतेर्वास्याद्दानकर्मणोहस्तोहंतेः ॥ ४ ॥
ग्राम्रहेननेदहिस्तोत्रभ्यःकामान्मासमाननिदंहीर्मासमानतिहायदाम

गोनोस्तबृहद्वदेमस्वेवदनेभगोभजतेर्बृहदितिमहतोनामधेयंपरिबृ
ढंभवतिवीरवंतःकल्याणवीरावावीरोवीरयस्वमित्रान्वितेर्गास्याऊति
कर्मणोवीरयतेवासीमितिपरिग्रहार्थीयोवापदपूरणोवा॥ प्रसीमादि
त्योअसृजत॥ प्रासृजदितिवाप्रासृजत्सर्वतइतिवासिसीमतःसुरुचोव
नआवरितिचव्यृणोत्सर्वतआदित्यःसुरुचआदित्यरश्मयःसुरोच
नादपिवासीमेत्येतदनर्थकमुपबंधमाददीतपंचमीकर्मणासीमूःसी
मतःसीमातोमर्यादातःसीमामर्यादाविषीव्यतिदेशावितिस्वइतिवि
निग्रहार्थीयंसर्वनामानुदात्तमधिनामेत्येके॥ ७ ॥स्त्रांत्वःपौष्णमा
सेपुपुष्वान्गायत्रंत्वोगायतिशाक्वरीषु॥ब्रह्मात्वोवदतिजातविद्यांय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञस्यमात्रांविमिमीतउत्वः॥इत्यत्विक्कर्मणांविनियोगमाचष्टऋचोमेकःपो
षमास्तेपुपुष्वान्होतर्गेचेनीगायत्रमेकोगायतिशक्वरीषट्कातीगायत्रंगा
यतेःस्तुतिकर्मणःशक्वयेऋचःशक्नोतेस्तद्यदास्तिर्वत्रमशकद्वेतुंतच्छक्व
रीणांशक्वरीत्वमितिविज्ञायतेब्रह्मनेकोजानेजानेविद्यावदितिब्रह्मासर्व
विद्यःसर्वंवेदितुमर्हतिब्रह्मापरिवृढःश्रुततोब्रह्मपरिवृढंसर्वतोय
ज्ञस्यमात्रांविमिमीतएकोध्वर्युरध्वर्युरध्वरयुरध्वरंयुनक्त्यध्वरस्यने
तोध्वरंकामयतइतिवापिवाधीयानेयुरुपबंधोध्वरइतियज्ञनामध्वरति
हिंसाकर्मीतस्यनिषेधोनिपानइत्येकेतत्कथमनुदात्तप्रकृतिनामस्या ॥ ५ ॥
इष्टयेयंतुभवत्युनत्वेसरव्येस्थिरपीतमाकुरिनिहितीयायामुतोत्वेमे

तन्वंविसस्वइतिचतुर्थ्यामथापिप्रथमाबहुवचने॥ ८ ॥अक्ष्णंवतुःकर्णं
वंतुःसरवायोमनोजवेष्वसमाबभूवुः॥आदघ्नासउपकक्षासउलेकुश
इवस्नावाउलेदहश्रे॥अक्षिमंतःकर्णवंतःसरवायोक्षिचक्षुरनक्तेरित्याश्रा
यणस्तस्मादेतव्यक्तनेरेवमवतइतिहविज्ञायतेकर्णःकृंततेर्निकृत्तहा
रोमवस्छेतरित्यायायणऋछतीवरेवउदगंतामितिहविज्ञायतेमनसो
जवेषसमाबभूवुरास्यदघ्नाअपरउपकक्षदघ्नाअपरआस्यमस्यते
रास्यंदतएनदन्नमितिवादघंदछतेःस्रवतिकर्मणोरस्यतेर्वास्याद्विदस्तत
रंभवतिप्रस्नेयाद्रुदाइवेकेप्रस्नेयादहशिरस्नानाहीद्रुदोद्रादतेःशब्दकर्म
णोह्लादतेर्वास्याछीतीभावकर्मणोथापिसमुच्चयार्थेभवतिपर्यायाइव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खदाश्विनमाश्विनं-वपर्याया श्वेत्यथये प्रकृतेर्थे मिताक्षरेषु ग्रंथेषुवाक्यपू
रणा आगच्छंति पदपूरणास्तेमिताक्षरेष्वनर्थकाः कर्मीमिद्धिति ॥ ९ ॥
निष्टक्रासश्चिद्धिन्नरोभूरितोकावृकादिव ॥ बिभ्यस्यंतोववाशिरेशिशिरंजी
वनायकं ॥ शिशिरंजीवनाय ॥ शिशिरंशृणातेः शाम्नातेर्वा ॥ एमेनंसृजनासु
ते ॥ आसृजतेनंसुते ॥ तमिद्धर्धंतुनोगिरः ॥ तंवर्धंतुनोगिरः स्तुतयोगिरोगृणा
तेः ॥ अयमुतेसमतसि ॥ अयंतेसमतसीवापिदृश्यतेसुविद्वरिवसुविज्ञायतेइ
वाथापिनेयेषइंद्रियेतेनसंप्रयुज्यतेपरिभाषये ॥ १० ॥ हविर्शिरेकेस्वरितःस
वंतेसुन्वंतएकेसवनेषुसोमान ॥ शचीमदंतउतदक्षिणाभिर्नोज्जिहायंत्यो
नरकंपतामेति ॥ नरकंन्यरकंनीचैर्गमनेनास्मिन्नमणंस्थानमल्पमप्यस्ती ॥ ६ ॥

तिवाथापिनचेत्येषइंद्रियेतेनसंप्रयुज्यतेनुदृष्टेनचेत्सुरांपिबंतीतिसुरासुनो
तेरेवमुच्चावचेष्वर्थेषुनिपतंतिनउपेक्षितव्याः ॥ ११ ॥ इतीमानिचत्वारिपद
जातान्यनुक्रांतानि नामाख्यातेचोपसर्गनिपाताश्चतत्रनामान्याख्या
तजानीतिशाकटायनोनैरुक्तसमयश्चनसर्वाणीतिगार्ग्योवैय्याकरणा
नांचैकेतद्यत्रस्वसंस्कारोसमर्थोग्रादेशिकेनगुणेनान्वितोस्यातांसंवि
ज्ञातानितानियथागोरश्वःपुरुषोहस्तीत्यथचेत्सर्वाण्याख्यातजानिना
मानिस्युर्यःकश्चनकर्मकुर्यात्सर्वंतत्सलंतथात्वक्षीरन्यःकश्चाध्वानमश्नु
वीताश्वःसक्तनीयस्याद्यत्किंचित्पंथात्रणंतदथापिचेत्सर्वाण्याख्यात
जानिनामानिस्युर्यावद्भिर्भावैःसंप्रयुज्येतनावद्धोनामधेयप्रतिलंभःस्या

त्रैवंरूपाणादरङायावासंजनीचस्यात्॥ १२ ॥अथापियएषान्यायवान्का
र्मनामिकःसंस्कारोयथाचापिप्रतीतार्थोनिस्युस्तथैनान्याचक्षीरन्सुरुषंपुरिङाय
इत्याचक्षीरन्नष्टेत्यश्वंतर्दनमितिरणमथापिनिष्पन्नेभिव्याहारेभिविचारयंति
प्रथनात्पृथिवीत्याङुःकएनामप्रथयिष्यत्किमाधारश्चेत्यथानन्वितेर्थेप्रादेङि
केविकारेपदेभ्यःपदेतरार्थान्त्संचस्कारङाकयायनएतेःकारितंचयकारादिचांत
करणमस्तेःशुङ्गंचसकारादिंचाथापिसलपूर्वेभावइत्याङुरपरस्माङ्गावात्पू
र्वस्यप्रदेङोनोपपद्यतइतितदेतंनोपपद्यते॥ १३ ॥यथोहिनुवाएतत्तद्धत्रस्वरसं
स्कारोसमर्थोप्रादेङिकेनगुणेनान्वितोस्यातांसर्वेप्रादेङिकमित्येवंसत्यनुपा
लंभएषभवतियथोएतद्यः कश्चत्कर्मकुर्यात्सर्वंतत्सत्वंतथाचक्षीरन्निति पश्या ॥ ७ ॥

मःसमानकर्मणांनामधेयप्रतिलंभमेकेषांनैकेषांयथातक्षापरिव्राजकोजीवनो
भूमिजइत्येतेनवोत्तरःप्रत्युक्तोयथोएतद्यथाचापिप्रतीतार्थानिस्युस्तथैनान्याच
क्षीरन्निति संस्कल्पप्रयोगाःरुतोप्येकपदिकायथाव्रततिर्दमूनाजाङ्घ आङ्गारो
जागरूकोदर्विहोमीतियथोएतन्निष्पन्नेभिव्याहारेभिविचारयंतीतिभवतिहि
निष्पन्नेभिव्याहारेयोगपरीष्टिःप्रथनात्पृथिवीत्याङुःकएनामप्रथयिष्यत्कि
माधारश्चेत्यथवेदङ्गानिनदृथुरप्रथिताचेदप्यन्यैरथाप्येनंसर्वएवदृष्टप्रवादाउ
पालभ्यंतेयथोएतत्पदेभ्यःपदेतरार्थान्त्संचस्कारेतियोनान्विते र्थेसंचस्कारसतेन
गर्ह्यःसेषापुरुषगर्हानङास्त्रगर्हाइतियथोएतदपरस्माङ्गावात्पूर्वस्यप्रदेङोनो
पपद्यतइतिपश्यामःपूर्वोत्पन्नानांसत्वानामपरस्माङ्गावान्नामधेयप्रतिलंभमेके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निरु० ॥ ८ ॥

षांन्नेकेषांयथाबिल्वादोलंबचूडकइतिबिल्वंभरणाद्वाभेदनाद्वा॥ १४ ॥अथापी
दमंतरेणमंत्रेषवर्थप्रत्ययोनविद्यतेर्थमप्रतियतोनात्यंतंस्वरसंस्कारोदृश्यतेदं
विद्यास्थानंव्याकरणस्यकार्त्स्न्येस्वार्थसाधकंचयदिमंत्रार्थप्रत्ययायानर्थकंभवे
तीतिकोत्सोनर्थकाहिमंत्रास्तदेतेनोपेक्षितव्येनियतवाचोयुक्तयोनियतानुपूर्व्या
भवंत्यथापिब्राह्मणेनरूपसंपन्नाविधीयंतउरुप्रथस्वेतिप्रथयतिश्रोहाणीतिश्रो
हत्यथाप्यनुपपन्नार्थाभवंत्योषधेत्रायस्वैनंस्वधितेमैनंहिंसीरित्याहहिंसन्न
थापिविप्रतिषिद्धार्थाभवंति॥एकएवरुद्रोवतस्थेनद्वितीयायः॥असंख्याताःसहस्रा
णियेरुद्राअधिभूम्यां॥अहंरुद्रेभिस्त्रिषष्टःशतंसेनाअजयत्साकमिंद्रइत्यथा
पिजानंतंसंप्रेष्यत्यग्नयेसमिध्यमानायानुब्रूहीत्यथाप्याहादितिःसर्वमित्यादिति ॥ ८ ॥

द्यौरदितिरंतरिक्षमितितदुपरिष्टाद्व्याख्यास्यामोथाप्यविस्पष्टार्थाभवंत्यम्यग्या
दृश्मिंजारयायिकाणुकेति॥ १५॥अर्थवंतःशब्दसामान्यादेतद्धयस्येतेसमूढं
यद्रूपसमृद्धंयत्कर्मक्रियमाणमभ्युदर्कंभवतीतिचब्राह्मणंक्रीळंतोपुत्रैर्नह
भिरितियथोएतन्नियतवाचोयुक्तयोनियतानुपूर्व्याभवंतीतिलोकिकेष्वप्येतद्ध
येंद्राग्नीषितापुत्राविंतियथोएतद्ब्राह्मणेनरूपसंपन्नाविधीयंतइत्युदितानुवादः
संभवतियथोएतदनुपपन्नार्थाभवंतीत्याम्नायवचनादहिंसाप्रतीयतेयथोएतद्धि
प्रतिषिद्धार्थाभवंतीतिलोकिकेष्वप्येतद्यथासफलोयंब्राह्मणोनमित्रोराजेतिय
थोएतज्जानंतंसंप्रेष्यतीतिजानंतमभिवादयतेजानतेमधुपर्कंप्राहेतियथोए
दृदितिःसर्वमितिलोकिकेष्वप्येतद्यथासर्वरसाअनुप्रासाःपानीयमितियथोए

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदविस्पष्टार्थाभवंतीतिनेषस्थाणोरपराधोयदेनमंधोनपश्यतिपुरुषापराधः
संभवतियथाजानपदीषुविघातःपुरुषविद्वेषोभवतिपारोवर्यवित्कुतुखलुवेदि
त्रषुभूयोविद्यःप्रशस्योभवति॥ १६ ॥अथापीदमंतरेणपदविभागोनविद्यते॥
अवसायपठतेरुदमृक्तेतिपदुदवसंगावःपथ्यदनमवतेर्गत्यर्थस्यसोनामकरण
स्तस्मान्नावगृह्णत्यवसायाश्वानितिस्थतिरुपस्पृष्टोविमोक्षनेतस्मादवगृह्णति
इतोनिर्मत्याइदमाजगामेतिपंचम्यर्थप्रेक्षावोषष्ठ्यर्थप्रेक्षावाःकारांतेपरोनि
र्मत्याआचष्टेतिचतुर्थ्यर्थप्रेक्षेकारांतेपरःसंनिकर्षःसंहितापदप्रकृतिःसंहि
तापदप्रकृतीनिसर्वचरणानांपार्षदान्यथाषियाग्नेदेवतेनबहवःप्रदेशाभवं
तितदेतेनोपेक्षितव्यंतेचेद्भूयुर्लिंगशाअत्रस्मइति॥इंद्रंनत्वाश्रावसादेवतावा ॥७॥

युंपतंतीतिवायुलिंगंचेंद्रलिंगंचाग्नेयमंत्रोग्निरिवमन्योविषितःसहस्वेतिन
थाग्निर्मान्यवेमंत्रेविषितोज्वलितस्त्विषितस्त्विषिरित्यप्यस्यदीप्तिनामभवत्य
थापिज्ञानप्रशंसाभवत्यज्ञाननिंदाच॥ १७॥स्थाणुरयंभारहारःकि
लाभूदधीत्यवेदंनविजानातियोर्थं॥योर्थज्ञइत्सकलंभद्रमश्नुतेनाक
मेतिज्ञानविधूतपाप्मा॥यद्गृहीतमविज्ञातंनिगदेनैवशब्द्यते॥अन
ग्नाविवशुष्केधोनतज्वलतिकर्हिचित्॥स्थाणुस्तिष्ठतेरर्थातररणस्थो
वा॥ १८ ॥उतत्वःपश्यन्नददर्शवाचमुतत्वःशृण्वन्नशृणोत्येनां॥उ
तोत्वस्मैतन्वंविसस्रेजायेवपत्यउशतीसुवासाः॥अथैकःपश्य
न्नपश्यतिवाचमपिचशृण्वन्नशृणोत्येनामित्यविद्वांसमाहार्धमथै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्मैतन्वंविसस्रइतिस्वमात्मानंविवृणुतेज्ञानंप्रकाशनमर्थस्याहानया
वाचोपमोत्तमयावाचाजायेवपत्यकामयमानासुवासाऋतुकालेषुसु
वासाःकल्याणवासाःकामयमानाऋतुकालेषुयथासएनांपश्यतिस
शृणोतीत्यर्थज्ञप्रशंसातस्यैत्तरामयसेनिवचनाय॥ १९ ॥उनत्व
सख्यस्थिरपीतमाहुर्नैनोहन्वंत्यपिवाजिनेषु॥ अथेन्वाचरतिमायये
षवाचंशुश्रुवाँअफलामपुष्पां॥ अप्येकंवाक्सख्यस्थिरपीतमाहरमा
णंविपीतार्थंदेवसख्यंरमणीयेस्थानइतिवाविज्ञातार्थंयन्नाप्नुवंति
वाग्ज्ञेयेषुबलवत्स्वप्येधेन्वाद्येषचरतिमाययावाकृतिरूपयानास्मै ॥१०॥
कामंदुग्धेवाग्दोह्यादेवमनुष्यस्थानेषुयावाचंश्रुतवान्भवत्यफलाम

पुष्पामित्यफलास्माअपुष्पावाभवतीतिवाकिंचित्पुष्पफलेतिवार्थंवाचः
पुष्पफलमाहयाज्ञेदेवतेपुष्पफलेदेवताध्यात्मेवासाक्षात्कृतधर्माण
ऋषयोबभूवुःस्तेवरेभ्योसाक्षात्कृतधर्मभ्य उपदेशेनमंत्रान्त्संप्रादुरु
देशायग्लायंतोवरैर्बिल्मग्रहणायमंत्रयथेसमाम्नासिषुर्वेदंचवेदांगा
निचबिल्मंमिल्मंक्षासनमितिवेनावंतःसमानकर्माणोघातवोधातु
र्दधातेरेतावंत्यस्यसत्वस्यनामधेयान्येतावतामथोनामिदमभिधा
नंनैघंटुकमिदंदेवतानामग्राधान्येनेदमितिचयदन्यदेवतेमंत्रेनिप
तितिनैघंटुकंतत्॥ अश्वंनत्वावारवंतं॥ अश्वमिवत्वावालवंतंवाला
दंशवारणार्थंपुच्छवंतंदंशोदशतेः॥ मृगोनभीमःकुचरोगिरिष्ठाः॥ म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गद्वसीमः कुचरोगिरिष्ठाःमृगोमोर्ष्टगतिकर्मणोभीमोबिभ्यत्यस्माद्वी
भाव्यतस्मादेवकुचरइतिचरतिकर्मकुत्सितमथचैतद्वतोभिधानंका
येनचरतीतिगिरिष्ठागिरिस्थायीगिरिःपर्वतःसमुद्गीर्णोभवतिपर्ववा
पर्वतःपर्वपुनःपृणातेःश्रीणातेर्वापर्वमासपर्वदेवानस्मिन्प्रीणंतीतितस्य
धिसामान्यान्मेघस्थायीमेघोपिगिरिरेतस्मादेवतद्यानिनामानि प्राधान्यस्तु
देवतानांतद्देवतमित्याचक्षतेतदुपरिष्टाद्व्याख्यास्यामोनैघंटुकानिनैगमा नीहह
॥ २० ॥ समाम्नायस्तत्रचतुष्टयमतोन्येथनिपाताोवायुर्वोत्वा नन्नूनंनूनंसा
तत्रचोत्वोक्षण्वंतोनिष्टक्रासोहविर्भिरितीमान्यथापियोयथोहिन्वथा
पीदमर्थवंतोथापीदंस्थाणुरयमुतत्वःपश्यन्नुतत्वंसख्येविंद्रा
तिः॥ २० ॥ ॥इतिनैरुक्तेपूर्वषट्केप्रथमोध्यायः॥ ॥ॐम॥ ॥११॥

ओमा अथनिर्वचनंतद्येषुपरेषुस्वरसंस्कारेसमर्थौप्रादेशिकेनगुणेना
न्वितौस्यातांतथातानिनिब्रूयादथानन्वितेर्थेप्रादेशिकेविकारेर्थंनित्यः
परीक्षेतकेनचिद्वृत्तिसामान्येनाविद्यमानेसामान्येप्यक्षरवर्णसामा
न्यान्निब्रूयान्नत्वेवंनिर्ब्रूयान्नसंस्कारमाद्रियेतविज्ञायतेह्यार्षेवृत्तयो
भवंतियथार्थंविभक्तीःसंनमयेत्यत्तमवत्तमितिधात्वादीएवशिष्येते
अथाप्यस्तेर्निवृत्तिस्थानेषादिलोपोभवतिस्तःसंतीत्यथाप्यंतलोपो
भवतिगत्वागतमित्यथाप्युपधालोपोभवतिजग्मतुर्जग्मुरित्यथाप्यु
पधाविकारोभवतिराजादंडीत्यथापिवर्णलोपोभवतितत्वायामीत्यथा
पिद्विवर्णलोपस्तुचेत्यथाप्यादिविपर्ययोभवतिज्योतिर्घनोबिंदुर्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्य इत्यथाप्यायंत विपर्ययोभवति स्तोकाऽऽसिक्तास्तकिंस्यथाप्यं
तव्यापत्तिर्भवति ॥ १ ॥ ओघोमेघोनाधोगाधोवधूर्मध्यित्यथापिवर्णो
पजनआस्यद्वारोभरुजेतितद्यत्रस्वरादनंतरांतस्थोतथोतुभवतितद्धि
प्रकृतीनांस्थानमितिचेदिंतित्रसिध्यायामनुपपद्यमानायामितर
योपपिपादयिषेत्तत्राप्येकेल्पनिष्पत्तयोभवंतितद्यथैतद्वृतिर्मृदुःपृ
थुःपृषतःकृष्णारुमित्यथापिभाषिकेभ्योधातुभ्योनेगमाःकृतोभाष्यं
तेदमूनाःक्षेत्रसाधाइत्यथापिनैगमेभ्योभाषिकाउल्लंघतमित्यथा
पिप्रकृतयएवैकेषुभाष्यंतेविकृतयएकेषुज्ञायंतेगतिकर्मकंबोजे
घवभाष्यतेकंबोजाःकंबलभोजाःकमनीयभोजावाकंबलःकमनी ॥ १२ ॥

दृष्टेनसंपद्यतइतिवा २

योभवतिविकारमस्यार्थेषुभाषंतेशवइतिदात्तिर्लवनार्थेप्राच्येषुदात्रमुदीच्ये
ष्वेवमेकपदानिनिर्ब्रूयादथतद्धितसमासैकपर्वसुचानेकपर्वसुचपूर्वपूर्व
मपर[illegible]मपरंप्रविभज्यनिर्ब्रूयाद्दंड्यःपुरुषोदंडपुरुषोदंडमर्हतीतिवादंडोदद
तेधारयतिकर्मणोकरोदद्तेमणि[illegible]मित्यभिभाषंतेदमनादियोपमन्यवो
दंडमस्याकर्षतेतिगर्हायांकक्ष्यास्रुरश्वस्यकक्षंसेवतेकक्षोगाहतेःक्सइति
नामकरणःख्यातेर्वानर्थकोभ्यासःकिमस्मिन्ख्यानमितिकथतेवातत्सामान्या
न्मनुष्यकक्ष्वाडु[illegible]मूलसामान्यादश्वस्य ॥ २ ॥ राज्ञःपुरुषोराजपुरुषो
राजाराजतेःपुरुषःपुरिशयःपूरयतेर्वापूर्यतेंतरित्यंतरपुरुषमभिजे
त्य ॥ यस्मात्परंनापरमस्तिकिंचियस्मान्नाणीयोनज्यायोस्तिकश्चित ॥ वृक्षइव
स्तब्धोदिवितिष्ठत्येकस्तेनेदंपूर्णंपुरुषेणसर्वमित्यपिनिगमोभवतिविश्वकर्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षीवीतिवकद्रूतिश्वगतोभाष्यतेद्रातीतिगतिकुत्सनाकद्रातीतिद्रातिकुत्सनाचक
द्रातिकद्रातीतिस्तोनर्थकोभ्यासस्तदस्मिन्नस्तीतिविश्वकद्रः कल्याणवर्णरूपः कल्या
णवर्णस्यवास्यरूपंकल्याणंकमनीयंभवतिवर्णोवर्णोतेरूपंरोचतेरवंतद्धितसमासा
न्निर्ब्रूयान्नेकपक्षान्निर्ब्रूयान्नोवेद्याकरणायनानुपसन्नायानिदंविदेवानिदं
ह्यविज्ञातुर्विज्ञानेसूयोपसन्नायतुनिर्ब्रूयाद्योवालंविज्ञातुंस्यान्मेधाविनंतपस्विनंवा
॥ ३ ॥ विद्याहवैब्राह्मणमाजगामगोपायमावोवधिष्टहमस्मि॥असूयकायाऽ
नृजवेयतायनमाब्रूयावीर्यवतीतथास्यां॥यआत्मानंतपसाकर्शयतेनकर्णाद्विदुःस्वंकुर्व
न्नमृतंसंश्रयद्ध्वं॥तंमन्येतपितरंमातरंचतस्मैनद्रुह्येत्कतमच्चनाह॥अध्यापिता
येगुरुंनाद्रियंतेविप्रावाचमनसाकर्मणावा॥यथैवतेनद्रुरेभोजनीयास्तथैवतांस
भुनक्तिश्रुतंतनूंयमेवविद्याःशुचिमप्रमत्तंमेधाविनंब्रह्मचर्योपपन्नं॥यस्तेनद्रुह्ये ॥१३॥

कतमच्चनाहतस्मैमाब्रूयानिधिपायस्तेब्रह्मन्तिनिधिःश्रोवधिरिति॥४॥अथातो
नुक्रमिष्यामोगौरितिपृथिव्यानामधेयंयद्दूरंगताभवतियच्चास्यांभूतानिगच्छंति
गातेर्वाकारोनामकरणोथापिपशुनामेहभवत्येतस्माद्देवाथाप्यस्यांताद्धितेनक
त्रवान्निगमाभवंतिगोभिःश्रीणीतमत्सरमितिपयसोमत्सरःसोमोमंदतेस्तृप्तिक
र्मणोमत्सरइतिलोभनामामित्तएनेनधनंभवतिपयःपिबतेर्वापायतेर्वाक्षीरं
क्षरतेर्घसेर्वारोनामकरणउद्गीरमितियथाशुंदुहंतोअध्यासतेगवीस्यधिषवण
चर्मणोंशुःश्रामष्टमात्रेभवत्यमनायशंभवतीतिवाचर्मचरतेर्वोच्चृत्तंभवतीति
वाथापिचर्मवच्छ्लेष्माचगोभिःसंनद्धोअसिवीक्यस्वेतिरथस्कृतावथापिस्नाव
वच्छ्लेष्माचगोभिःसंनद्धापततिप्रसूतेनीषुस्कृतोज्यापिगोरुच्यतेगव्याचेत्तास्मि
न्मथचेन्नगव्यागमयतीषूनिति॥५॥वृक्षेवृक्षेनियतामीमयद्गोस्ततोवयः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अमेतान्यूरुषादः ॥ दक्षेदक्षेधनुषिधनुषिदक्षोब्रश्चनाद्दक्षोतिष्ठतीतिवादक्षाक्षि
यतेर्निवासकर्मणोनियतामीमयद्भोः शब्दंकरोतिमीमयःशब्दकर्माततोवयःप्रपतंति
पुरुषानादनायविरितिशाकुनिनामवतेर्गतिकर्मणोथापीषुनामेहभवत्यतस्मादेवादि
त्योपिगोरुच्यते ॥ उतादःपरुषेगवि ॥ पर्ववतिभास्वतीसोपमन्यवोथाप्यस्येकोरश्मिश्चं
द्रमसंप्रतिदीप्यतेतदेनोपक्षितव्यमादित्यतोस्यदीप्तिर्भवतीतिसुषुम्नःसूर्यरश्मिश्चं
द्रमागंधर्व इत्यपिनिगमोभवतिसोपिगोरुच्यते ॥ अत्राहगोरमन्वतेतिततुपरिष्टाद्व्या
ख्यास्यामःसर्वेपिरश्मयोगावउच्यंते ॥ ६ ॥ नावोवास्त्यूश्मसिगमध्येयत्रगावोभू
रिशृंगाअयासः ॥ अत्राहतदुरुगायस्यवृष्णःपरमंपदमवभातिभूरि ॥ तानिवावा
स्तूनिकामयामहेगमनायेयत्रगावोभूरिशृंगाभूरीतिबहुनोनामधेयंप्रभवतीति बहुशृंगा
सतःशृंगंश्रयतेर्वाशृणातेर्वाशरम्नातेर्वाशरणायोऽलमितिवाशिरसोनिर्ग ॥१४॥

तामितवायासायनास्तत्रतदुरुगायस्यविष्णोर्मेहागतेःपरमंपदंपराध्यस्थमव
भातिभूरि ॥ पादःपद्यतेस्तेर्निधानात्पदंपशुपादप्रकृतिःप्रसागपादःप्रसाग
पादसामान्यादितराणिपदान्येवमन्येषामपिसत्वानांसंदृश्यंतेतानिचे
त्समानकर्माणिसमाननिर्वचनानिनानाकर्माणिचेन्नानानिर्वचनानि
यथार्थंनिर्वक्तव्यानीतीमान्यकीर्वंशनिःपृथिवीनामधेयान्यनुक्रांतानि
नत्वनिर्ऋतिर्निरमणाद्दुःखेनःकृच्छ्रापत्तिरितरासार्थिव्यासंदृश्यतेतन
योर्विभागस्तस्याएषाभवति ॥ ७ ॥ यईचकारनसोअस्यवेदयईंददर्श
हिरुगिन्नुतस्मात् ॥ समानुर्योनापरिवीतोअंतर्बहुधाजानिर्ऋतिमा
विवेश ॥ बहुधाजाःकृच्छ्रमापद्यतइतिपरिव्राजकावर्षकर्मैतेनेरुक्ता

यईं च कोरति करोति किरतीसंदिग्धोवर्षकर्मणानसोस्यवेदमध्यमःसृए
वास्यवेदमध्यमोयोददृशेदित्योपहितंसमातुर्योनोमातांनरिक्षंनिर्मी
यंतस्मिन्भूतानियोनिरंतरिक्षंमहानवयवःपरिवीतोवायुनायमधीन
रोयोनिरंतस्मोदवर्परियुतोप्तवतिबहुप्रजाप्तमिमापद्यतेवर्षकर्मणाश्ना
कपूर्णिःसंकल्पयांचक्रेसर्वादेवताजानामीतितस्मेदेवताभयलिंगान्ना
दुर्बप्तूवतांनजज्ञेतांपप्रछविविदिषाणिखेतिसास्माएतामृचमादिद
शेषामेदेवतेति॥८॥अयंसशिङ्क्तेयेनगोरभीवनामिमातिमायुंध्व
सनावधिश्रितासाचित्तिप्तिर्निहचकारमर्त्यंविद्युद्भवंतीप्रवद्रिमोहत॥
अयंसशब्दायतेयेनगोरप्तिप्रवत्तामिमातिमायुंवाब्दंकरोतिमायु ॥१५॥
मिवादित्यमितिवावागेषामाध्यमिकाध्वंसनमेवाधिश्रितासाचित्तिप्तिः

कर्मभिर्नीचेतिकरोतिमर्त्यंविद्युद्भवंतीप्रत्यूहेनवाविंवाव्रारितिरूपनाम्नवृणो
तीतिसंतोवर्षेणप्रछाद्यपार्थिवंतत्पुनरादत्ते॥९॥हिरण्यनामान्युत्तराणि
पंचदशहिरण्यंकस्माद्धियतआयम्यमानमितिवाह्रियतेजनाज्जनमिति
वाहितरमणंभवतीतिवाहृदयरमणंभवतीतिवाहार्यतेवोस्यात्यभाक
र्मणोनरिक्षंनामान्युत्तराणिषाळशांनरिक्षंकस्मादंतराक्षांनंभवत्यंतरे
मइतिवाशरीरेष्वंतरक्षयमितिवातत्रसमुद्रइत्येतत्पार्थिवेनसमुद्रेणसं
दिह्यंतेसमुद्रःकस्मात्संमुद्रवंत्यस्मादापःसम्मिद्रवंत्येनमापःसंमो
दंतेस्मिन्भूतानिसमुदकोभवतिसमुनत्तीतिवातयोर्विभागस्तत्रेति
हासमाचक्षतेदेवापश्चार्षिषेणःशंतनुश्चकोरयोश्चान्तरोबभूवतुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सशंतनुःकनीयानभिषेचयांचक्रेदेवापिस्तपःप्रतिपेदेततःशंतनोराज्येद्वा
दशवर्षाण्यदेवान्ववर्षतमब्रुवन्ब्राह्मणाअधर्मस्त्वयाचरितोज्येष्ठंभ्रातर
मंतरित्याभिषेचितंतस्मात्तेदेवान्वर्षतीतिसशंतनुर्देवापिंशिशिक्षयि
ष्यन्तमुवाचदेवापिःपुरोहितस्तेसानियाजयानिचत्वेतिनस्येतदृषका
मसक्तंतस्येषाभवति ॥१०॥ आर्ष्टिषेणोहोत्रमृषिर्निषीददेवापिर्देव
सुमतिंचिकित्वान्॥ सउत्तरस्माद्धरंसमुद्रमुपोदव्याअस्रजद्रप्वाअ
क्षि॥ आर्ष्टिषेणऋष्टिषेणस्यपुत्रइषितसेनस्येतिवासिनासेश्वरासमा
नगतिर्वापुत्रःपुरुत्रायतेनिपरणाद्वापुन्नरकंततस्त्रायतइतिवाहोत्र
मृषिर्निषीदन्नृषिर्दर्शनात्स्तोमंाददर्शेत्योपमन्यवस्तद्यदेनांस्तपस्य

॥ राम्॥ ॥१६॥

मानान्ब्रह्मस्वयंभ्वभ्यानर्षन्तऋषयोभवंस्तद्दृषीणाम्ऋषित्वमितिविज्ञायते
देवापिर्देवानामाप्त्यास्कृत्याचप्रदानेनचदेवसुमतिंदेवानांकल्याणीमति
चिकित्वांश्चेतनावान्॥ सउत्तरस्माद्धरंसमुद्रंगउत्तरउदन्तरोभवत्य
धरोधोरोधोनधावतीत्यूर्ध्वगतिःप्रतिषेधात्स्योत्तराभ्रयसंनिर्वचना
य॥११॥ यद्देवापिःशंतनवेपुरोहितोहोत्रायवृतःकृपयन्नदीधेत्॥देव
श्रुतंवृष्टिवनिंरराणोबृहस्पतिर्वाचमस्माअयछत्॥शंतनुःशंतनोस्त्विति
वाशमस्मैतन्वाअस्त्वितिवापुरोहितःपुरएनंदधतिहोत्रायवृतःकृपायमाणो
न्वध्यायद्देवश्रुतंदेवाएनंशृण्वंतिवृष्टिवनिंवृष्ट्याचिनंरराणोरातिरभ्यस्तो
बृहस्पतिर्ब्रह्मासीत्सोस्मैवाचमयच्छद्बृहदुपव्याख्यातं॥ १२ ॥साधारणा
न्युत्तरणिषृष्टिवस्थादित्यस्यचयानित्वस्यप्राधान्येनोपरिष्टात्तानिव्याख्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ नि.१०॥ ॥१७॥ स्यामज्यादित्यः कस्मादादत्तेरसानादत्तेभासंज्योतिषामादित्तोभासतिवा
दितेःपुत्रइतिवाल्पश्रुतेर्योगंत्वस्येतदाचास्याम्नायसूक्तभाक्सूर्यमादित्त
यमदितेःपुत्रमेवमन्यासामप्येदेवतानामादित्यश्रुतिर्दारुक्तयाभवंति
तद्यथैतन्मित्रस्यवरुणस्यार्यम्णोदक्षस्यभगस्यांशस्येत्यथापिमित्रावरु
णयोः॥आदित्यादानुनस्यतीदानुषतीः॥अथापिमित्रस्यैकस्य॥प्रसामित्र
मतीअस्कृतयस्वान्यस्तआदित्याशिक्षतिव्रतेनस्यपिनिगमोभवत्यथापि
वरुणस्यैकस्य॥अथावयमादित्यव्रतेतव॥व्रतमितिकर्मनामनिरुक्तिकर्म
वारयतीतिसतइदमपीतरद्व्रतमेतस्मादेववृणीतीतिसतोन्नमपिव्रतमु
च्यतेयदावृणोतिशरीरं॥१३॥सुरादित्योभवतिअसुरयाःसुईरणःस्व
तारसान्त्स्वतोनामसंज्योतिषांस्वतोभासतिवेतेनद्योर्व्याख्याता॥१४॥

॥१७॥

अथादित्योभवतिआज्रुतएनंवर्णइतिनैरुक्ताःसंस्रुषारसान्त्संश्रुष्टाभासंज्यो
तिषांसंस्रष्टोभासतिवाथद्योःसंस्रष्टाज्योतिर्भिःपुण्यकृद्इव॥नाकआ
दित्योभवतिनेतारसानांनेताभासांज्योतिषांप्रणयाथद्योःकमितिसुरव
नाम तत्प्रतिषिद्धं प्रतिषिध्येतनवाअमुंलोकंजग्मुषेकिंचनाक॥नवा
अमुंलोकंगतवतेकिंचनासुखंपुण्यकृतोह्येवतत्रगच्छंति॥गौरादित्योभ
वतिगमयतिरसान्गच्छत्यंतरिक्षेयद्योर्यत्स्थाथिव्याअधिदूरंगतोभवति
यच्चास्यांज्योतींषिगच्छंति॥विष्टबादित्योभवत्याविष्टारसानाविष्टाभा
संज्योतिषामाविष्टाभासतिवाथद्योराविष्टाज्योतिर्भिःपुण्यकृद्इव॥न
भःआदित्योभवतिनेतारसानांनेताभासांज्योतिषांप्रणयोपिवाभनएव
स्याद्विपरीतान्नभातीतिवैतेनद्योर्व्याख्याता॥१५॥रश्मिनामान्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥निरू॰॥ त्तराणिपंचदशरश्मिर्यमनात्तेषामादितःसाधारणानिपंचाश्वरश्मिभि
॥१८॥ र्दृङ्नामान्युत्तराण्यंशोदिशःकस्माद्दिशतेरासदनादपिवाश्यशनात्तत्रका
ष्ठाइत्येतदेनकस्यापिसत्वस्यनाभस्यवृतिकाष्ठादिशोभवंतिक्रांत्वास्थि
नाभवंतिकाष्ठाउपदिशोभवंतीतरेतरक्रांत्वास्थिनाभवंत्यादित्यापिका
ष्ठाच्यंतेक्रांत्वास्थितोभवत्याज्यंतोपिकाष्ठाच्यंतेक्रांत्वास्थितोभवत्या
पापिकाष्ठाउच्यंतेक्रांत्वास्थितोभवंतीतिस्थावराणां ॥ १५ ॥ अतिष्ठं
तीनामनिवेशनानांकाष्ठानांमध्येनिहितंशरीरं ॥ यत्रस्यानिण्यंविच
रंत्यापोदीर्घंतमआशयदिंद्रशत्रुः॥ अतिष्ठंतीनामनिवेशमानानां ॥१८॥
मित्यस्थावराणांकाष्ठानांमध्येनिहितंशरीरंमेघःशरीरंशरीरंश्रुणा

तःश्रूयतेयत्रस्यानिण्यंनिर्णामंविचरंतिविजानंत्यापइतिदीर्घंश्रयते
स्तमस्तनोतेरुशयदाशेतेरिंद्रशत्रुरिंद्रोस्यशमयितावाशातयितावा
तस्मादिंद्रशत्रुस्तत्कोवृत्रोमेघइतिनरुक्तास्त्वाष्ट्रोसुरइत्यैतिहासिकाअ
पांचज्योतिषश्चमिश्रीभावकर्मणोवर्षकर्मजायतेतत्रोपमार्थेनयुक्तवर्णा
भवंत्यहिवत्तुरवलुमंत्रवर्णाब्राह्मणवादाश्चविवक्ष्याशरीरस्यस्रोतो
सिनिवारयांचकारतस्मिन्हतेप्रस्रवंतीरापस्तदभिवाहिन्येगर्भवि
ति॥ १६॥दासपत्नीरहिगोपाअतिष्ठन्निरुध्याआपःपणिनेवगावः॥
अपांबिलमपिहितंयदासीद्वृत्रंजघन्वांअप्तुरेवार॥ दासपत्नीरहिगोपा
पत्योदासादस्यतेरुपदासमतेकर्मोप्यहिगोपाअतिष्ठन्नहिनागुप्ता
अहिरयनादेत्यंतरिक्षेयमपीतरोहिरेतस्मादेवनिर्ऋसितोपसर्गआह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीति॥निरुक्ता आपः पणिर्नवगावः॥पाणिर्वणिग्भवतिपणिः पणनाद्वणिक्पण्यंनेनेक्ति॥अपांबिलमपिहितंयदासीत्॥बिलंभरंभवतिबिभर्तेर्वृत्रंजघ्निवानपधारतदस्रोवणोतेर्वा वर्ततेर्वा वर्धतेर्वा यदवृणोत्तद्वृत्रस्यवृत्रत्वमितिविज्ञायतेयदवर्तततद्वृत्रस्यवृत्रत्वमितिविज्ञायतेयदवर्धततद्वृत्रस्यवृत्रत्वमितिविज्ञायते॥१७॥रात्रिनामान्युतरणिंत्रयोविंशतीरात्रिःकस्मात्स्मरमयतिभूतानिनकंचाप्युपरमयतीतरणिंध्रुवीकरोतिरातेर्वास्याद्दानकर्मणःप्रदीयंतेस्यामवश्यायाउषोनामान्युतरणिंपोकशोषाःकस्माद्उछतीतिसत्यारात्रेरपरःकालःतस्याएषाभवति॥१८॥इदंश्रेष्ठंज्योतिषांज्योतिरागमच्चित्रंप्रकेतनंअज्ञाततमंअजनिष्टविभूततमंयथाप्रसूतासवितुःप्रसवायरात्रिरादित्यस्येवंरात्र्युषसेयोनिमरिचत्स्थानंस्त्रीयोनिरभियुतएनांगर्भस्तस्याएषापरंभवति॥१९॥रुशद्वत्सारुशतीश्वेत्यागादारेगुकृष्णासदनान्यस्याः॥समानबंधूअमृतेअनूचीद्यावावर्णंचरतआमिनाने॥रुशद्वत्सासूर्यवत्सारुशदितिवर्णनामरोचतेर्ज्वलतिकर्मणःसूर्यमस्यावत्समाहसाहचर्याद्सहरणाद्वारुशतीश्वेत्यागात्॥श्वेताश्वेततेरिचत्कृष्णासदनान्यस्याःकृष्णवर्णारात्रिःकृष्णकृष्यतेर्निकृष्टोवर्णोथनेसंस्तोतिसमानबंधूसमानबंधनेअमृतेअमरणधर्माणावनूचीअनूच्यावितीतरेतरमभिप्रेत्यद्यावावर्णंचरतस्तेएवद्यावोद्योतनादपिवाद्यावाचरतःसहचरतइतिस्यादामिनानेआमिन्वानेअन्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यस्याध्यात्मं कुर्वाणेऽहर्नामान्युत्तराणि द्वादशाहः कस्मादुपाहरंत्य
स्मिन्कर्माणि तस्येषनिपातोऽसवति वैश्वानरीयायार्भवे ॥२०॥ अह
श्चकृष्णमहरुच्यतेऽनंचविवर्ततेरजसीवेद्यभ्रिः॥ वैश्वानरोजायमानो
नराजावातिरज्योतिषाग्निस्तमांसि॥ अहश्चकृष्णंरात्रिःशुक्लंचाह
रुच्यतेऽनंविवर्ततेरजसीवेद्यभ्रिरेवैदितव्याभ्रिःप्रवृक्तभ्रिर्वैश्वानरोजाय
मानइवोद्यन्नादित्यःसर्वेषांज्योतिषांराजावाहन्नग्निर्ज्योतिषातमांसि
मेघनामान्युत्तराणित्रिंशन्मेघः कस्मान्मेहतीतिसतआउपरउपल
इत्येतास्योसाधारणानिपर्वतनामान्यक्षिरुपरउपलोमेघोपसव्युपरम
स्तेस्मिन्नभ्राण्युपरताआपइतिवानिषोमेषोपसवति ॥२१॥ दिवानांमानि ॥२०॥
प्रथमाऽतिषन्क्रूनत्रीदशासुपराऽदायन्॥ त्रयस्त्रपंतिपृथिवीमनूपाद्बबू

कंवहतःपुरीषं॥ दिवानांनिर्माणेप्रथमाऽतिषन्माध्यमकोदवगणाःप्रथम
इतिमुख्यनामाऽसवतिकंनत्रमंतरिक्षंविकर्तनंमेघानांविकर्त
नंमेघानामुदकंभवतीयेद्व॥ त्रयस्त्रपंतिपृथिवीमनूपाः॥ पर्जन्योवायुरा
दित्यःशीतोष्णवर्षैरापधीःपाचयंत्यन्नपाऽनुवपंतिलोकान्स्वेनस्वेन
कर्मणायमपीतरोन्नपएतस्मादेवान्नाप्यतउदकेनापिवान्वाभिस्याद्यथा
प्राणितस्यान्नपइतिस्याद्यथाप्राचीनमिति॥ द्बाबूकंवहतःपुरीषं॥
वाय्वादित्याउदकंबबूकमित्युदकनामब्रवीतेवाशब्दकर्मणोऽन्नशतेवा
पुरीषंपृणातेःपूरयतेर्वा॥२२॥ वाङ्नामान्युत्तराणिसप्तपंचाशद्वाक्
स्माद्वाचस्तत्रसरस्वतीत्येतस्यनदीवद्देवनावच्चनिगमाभवंतितद्यद्देवना
वदुपरिष्टात्तद्व्याख्यास्यामोथेतन्नदीवत्॥ २३॥ इयंशुष्मेभिर्बिसखा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इवारुज्रत्सानुगिरीणांतविषीभिरूर्मिभिः॥पारावतघ्नीमवसेसुवृक्ति
भिःसरस्वतीमाविवासेमधीतिभिः॥इयंशुष्मेभिर्बिसखेवरोहतीपुरुस्पृहा
नामशोभयतीतिसप्तोबिसेबिस्यतेर्भेदनकर्मणोऽधिकर्मणोवासा
नुसमुच्छ्रितेभवतिसमुन्नमितिवामहद्भिरूर्मिभिःपारावतघ्नीप
रावारघात्रिनीपारंपरंभवत्यवारमवरमवनायसुप्रवृत्तभिःशोभ
नाभिःस्फातिभिःसरस्वतीनदीकर्मभिःपरिचेरमोदकनामान्युत्तरा
ण्येकशतमुदकंकस्मादुनत्तीतिसतोनदीनामान्युत्तराणिसप्तत्रिंश
न्नद्यःकस्मान्नदनाद्रमाभवंतिशब्दवत्योबहुलमासान्नेघंडुकंवृत्त ॥२१॥
माश्वयेमिवधावन्त्येनत्रेतिहासमाचक्षतेविश्वामित्रऋषिःसुदासः

पैजवनस्यपुरोहितोबभूवविश्वामित्रःसर्वमित्रःसर्वंसंस्तंसुदाःकल्याण
दानःपैजवनःपिजवनस्यपुत्रःपिजवनःपुनस्पर्धनीयजवोवामिश्रीषा
वगतिर्वीसवित्तंगृहीत्वाविपाट्छुतुद्र्योःसंसेदमाययावनुययुरितरे
सविश्वामित्रानदीस्तुष्टावगाधाभवतेत्यपिह्वदपिबहुवक्त्वद्यहिवद
परिष्टात्तद्व्याख्यास्यामोथितद्बहुवत् ॥ २४ ॥ रमध्वंमेवचसेसोम्या
यऋतावरीरूपमुहूर्तमेवैः॥प्रसिंधुमध्वहतीमनीषावस्युरद्रुकुशि
कस्यसूनुः॥उपरमध्वंमेवचसेसोम्यायसोमसंपादिनऋतावरीर्ऋ
तवत्यऋतमित्यृदकनामप्रत्यृतंभवतिमुहूर्तमेवैरयनेरवनेर्वामुहू
र्तीमुहूर्ताद्धूर्तारंतरतेर्गतिकर्मणोमुहुर्मोदइवकालोयावदक्षीक्ष्णंचै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यभीक्ष्णमभिक्षणंभवतिक्षणःक्षणोतेःअक्ष्णुतःकालःकालःकालय
तेर्गतिकर्मणःप्राप्तिकृयाभिसंधुंवहत्यामहत्यामनीषयामनसेईषया
स्कस्यान्नज्ञयावावनायकुशिकस्यसनुःकुशिकोराजाबभूवकोशतेः
शब्दकर्मणःक्रंशतेर्वास्यात्प्रकाशयतिकर्मणःसाधुवक्रोशायितार्थो
नामितिवानघःअत्यचुः॥२५॥इंद्रोअस्माँअरदद्वज्रबाहुरपाहन्वृ
त्रंपरिधिंनदीनां॥देवोनयत्सवितासुपाणिस्तस्यवयंप्रसवेयामउ
र्वीः॥इंद्रोअस्मानरदद्वज्रबाहूरदतिःखनतिकर्मापाहन्वत्रंपरिधिं
नदीनामितिव्याख्यातंदेवोनयत्सवितासुपाणिःकल्याणपाणिःपा ॥२२॥
णिःपणायतेःपूजाकर्मणःप्रगृह्यपाणीदेवान्यूजयंति॥तस्यवयंप

सवेयामउर्वीः॥उर्व्यउर्णोतेर्वृणोतेरित्योर्णवाभःप्रख्यायांतंतआशुशु
वुः॥२६॥आतेकारोशृणवामवचांसियथादृादनसारथेन॥
नितेनंमेपीप्यानेवयोषामर्यायेवकन्याशश्वचैते॥आशृणवामतेकारो
वचनानियाहिदूरादनसाचरथेनवनिनमामतेपाययमानेवयोषापुत्रंमघो
येवकन्यापरिष्वजनायनिनमाडतिवाश्वनामान्युत्तराणिषड्विंशतिस्तेषा
मष्टाउत्तरपणिबकुवदश्वःकस्मारश्रुतेधानंमहाज्ञानोभवतीतिवातत्रर्धि
काइत्येतद्धक्कामतीतिवादधक्कंदतीतिवादधदाकारीभवतीतिवातस्याश्व
बद्धवतावचनिगमाभवंतिनद्यद्धवतावदुपरिष्टान्नद्याख्यास्यामोथैतदश्व
तं॥२७॥उतस्यवाजीक्षिपणिंतुरण्यतिग्रीवायोबद्धोअपिकक्षआसनि॥
कृतुंरधिक्रांयदनुसंनयातित्पथामकोरन्यान्यपनीफणात्॥अपिसवाजीवजन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वानेषणमनुर्णामश्नुतेध्यानैगीर्वायंबधोगीर्वागिरतेर्वा गृणातेर्वा
गृह्णातेर्वौपिकक्षआसनीतिव्याख्यातंकुतुदधिक्राःकर्मवाजोवा॥अ
नुसंतवीत्वत॥तनोतेःपूर्वयाःकृत्यानिगमःपथामंकांसिपथांकुटिलानि
पंथोःपततेर्वापद्यतेर्वापंथतेर्वाकांचनेरापनीकणादिफणतेश्चकेरीतच्चतेर्द्रुतरण
प्यादिष्टोपयोजनानीत्याचक्षतेसाहचर्यज्ञानायज्वलतिकर्मणउत्तरधातवएकारद्र
तावंतेवोत्तराणिज्वलतोनामधेयानिनामधेयानि॥ ॥अथनिर्वचनमोद्या
राज्ञोविद्याहवाअथातोनेक्रमिष्यामोदक्षेतावांवास्कनियईचकारायंसग्निंके
हिरण्यनामान्याह्यिधेणोयद्देवापिःसाधारणानिसतादित्योरश्मिनामान्यति
ष्ठतीनांदासपत्नीरात्रिनामानीदंश्रेष्ठंरजाइत्साहश्वक्लृदेवानांमानेवाङ्नामा ॥२३॥
नीयंशुष्मेभीरमध्वंमरुद्रोअरमंनातेकारोउतस्यवाज्यशविंशतिः॥द्वितीयोध्यायः॥

॥ओम्॥कर्मनामान्युत्तराणिषड्विंशतिःकर्मकस्मात्क्रियतइतिसतोपल
नामान्युत्तराणिपंचदशापलेकस्मादपतनंभवतिनानेनपतलीतिवातद्व
थाजनयितुःप्रजेवमर्थीयंसचाउदाहरिष्यामः॥ १॥परिषद्यंह्यरण्यरण्या
निस्यरण्यःपतयस्यामः॥नद्रोषोअग्नेअन्यजातमुस्यचैतानस्यमायथाचि
दुक्षः॥परिहर्तव्यंहिनोपसर्तव्यमरणास्यरक्षणारणोपाणोभवतिरक्षणइति
धननामरिच्यतेप्रयतोनिसस्यरायःपतयस्यामः॥पित्र्यस्यधनस्य॥नद्रो
षोअग्नेअन्यजातमस्ति॥शेषइत्यपत्यनामश्रिष्यतेप्रयतोचेतयमाने
स्यतत्प्रमत्तस्यभवतिमानःपथोविदुषइतिस्यात्तराभूयसेनिर्वचनाय
॥ २॥नहिग्रभायारणःसुशेवोन्यादृग्योमनसामंतवाउ॥अथाचिदोकः
पुनरिसत्यानोवाज्यभीषाळेतुनव्यः॥नहिगृहीतव्योरणःसुसुखतमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यंन्योदर्यामनसापिनमंतव्योमृषायंपुत्रइत्यथस्त्रीकः पुनरेवतदेतियतऽ
आगतोभवत्येकइतिमिवासन्नामोच्यतेऽतुनोवाजीवेजनवानभिषहमायाः
सयत्नान्नवजातःसएवपुत्रइत्यथतोदुहितृदायाद्यउदाहरंतिपुत्रदायाद्य
इत्येके॥ ३॥शासहक्षिदुहितुर्नप्त्यंगाद्दिहाऽसनस्यदीधितिंसपूर्यन्॥पि
तायत्रदुहितुःसेकमृञ्जन्त्संशाग्म्येनमनसादधन्वे॥अशास्तिवोढासंता
नकर्मणेदुहितुःपुत्रभावेदुहितादुर्हितादूरेहितोदग्धेर्वानसारमुपागम
दोहित्रंपौत्रमितिविद्वान्प्रजनयन्नस्यरेतसोवांगादंगात्संभृतस्य
हृदयादधिजातस्यमातरिप्रयतस्यविधानंपूजयन्नविद्वेषणंमिथु
नाःपुत्रादायादाइतिनदेतदृक्श्लोकाभ्यामभ्युक्तो॥अंगादंगात्संभवसि ॥२४॥
हृदयादधिजायसे॥आत्मावैपुत्रनामासिसजीवशरदःशतमित्यविशे

षणपुत्राणांदायोस्तवतिधर्मतः॥मिथुनानांविसर्गादौमनुःस्वायंभुवोब्र
वीत्॥नदुहितरइत्येकेतस्मात्पुमादायादादायादास्त्रीतिविज्ञायतेतस्मा
त्स्त्रियंजातांपरास्यंतिनपुमांसमितिचस्त्रीणांदानविक्रयातिसर्गोवि
ध्वंतेनपुंसःपुंसोपीत्येकेशोनःशेपदर्शनात्॥आप्त्वात्मतीवादइ
त्यपरे॥अमृर्योयंतिजायःसवोलोहितवाससः॥अभ्रातरइवयोषाः
स्लिष्यंतिहतवर्त्मनः॥अप्त्वात्कादृवयोषास्लिष्यंतिसंतानकर्मणेपि
उदानायहतवर्त्मानइत्यप्त्वात्कायाअनिवाहश्रोपमिकस्तस्याः
नराप्त्वयसेनिर्वचनाय॥ ४ ॥अप्त्वातेवपुंसएतिप्रतीचीगर्ता
रुगिवसनयेधनानां॥जायेवपत्यउशतीसुवासाउषाहस्रेवनिरीणी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नि॰पू॰३ ॥२५॥ तेअक्षः॥ अभ्रातृकेवपुंसः पितृनेत्यभिमुखीसंतानकर्मणोपिंडदानायनप
तिंगतारोहिणीवधनलाभायरक्षिष्या जीगर्तिःसभास्थाणुंगृणातःसत्यस
गरोभवतितंतत्रयपुत्रायपतिकासारोहतितांतत्रा क्षेरा ह्वंतिसारिक्थं
लभतेऽमज्ञानसंज्ञयापिगर्त उच्यतेगुरुतल्पगोभवतिऽमज्ञानंऽम
श्रायनंऽमशरीरंशरीरं शृणातेःश्राम्यतेवाऽमश्रुलोमऽमनिश्रितंन
वतिलोमलुनातेर्वलीयतेर्वानोपरस्याविःकुर्याद्यदुपरःस्याविःकुर्या
ऊर्तेष्वास्यात्समायुकोयजमानइत्यपिनिगमोभवतिरथोपिगत उच्यते
गृणातेस्तुतिकर्मणः स्कृततमंयानं॥ आरोहथोवरुणमित्रगर्तमित्य
पिनिगमोभवतिजायेवपत्येकामयमानासुवासासंवृकालेषूपाहस ॥२५॥

नेवहंतान्विवृणुतेशूषाण्यतित्वतस्तउपमानाभ्रातरीमुपयच्छेतल्लोकं हृ
त्यतद्वदेतीत्यभ्रातृकायाउपयमनप्रतिषेधःप्रत्यक्षःपितुश्चपुत्रभावः
पितायत्रऽहितुरन्तायारेतःसकंप्रार्जयतिसंदधात्यात्मानंसंगमेनमम
सेत्यथेतांजाम्यारिक्थप्रतिषेधउदाहरंतिज्येष्ठंपुत्रिकायाइत्येक ॥५॥
नजामयेतान्वेतारिक्थमारे चकारगर्भसनितुर्निधानं॥ यदीमातरोजनयं
तवह्निमन्यःकर्तासुकृतोरन्यभंधन॥ नजामयेभगिन्येजामिरन्यस्याज
नयंतिजामयःसंजप्तेर्वास्याऽतिकर्मणोनिर्गमनप्राःयाभवतितान्वः
आत्मजःपुत्रोरिक्थंप्रारिचत्सादाच्चकारेनांगर्भनिधानीसनितुर्हस्त
ग्राहस्ययद्दिहमातरोजनयंतवह्निंपुत्रमवह्निंवास्त्रियमन्यतरःसंतानक
र्तृभवतिपुमांदायादोन्यतरोधीयेलाजामिःप्रदीयतेपरस्मै ॥ ६ ॥मनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्यनामान्युत्तराणिपंचविंशतिर्मनुष्याः कस्मान्मलाकर्माणिसीव्यंतिम
नस्यमानेनस्रष्टामनस्यतिः पुनर्मनस्वीभावेमनोरयत्वंमनुषोवातत्रपं
चजनाइत्येतस्यनिगमाभवंति ॥ ७ ॥ तद्यवाचःत्रयमंमसीययेनासुरान्
अभिदधाअसामाऊर्जादउतयज्ञियासःपंचजनाममहोवंजुषध्वं ॥ त
द्यवाचःपरमंमसीययेनासुरानभिभवेमदेवाअसुराअसुरतास्थाने
भ्यस्तास्थानेभ्यइतिवापिवासुरितिप्राणनामास्तःशरीरेभवतितेनतद्
तःसोदेवानसृजततत्सुराणांसुरत्वमसोरसुरानसृजततदसुराणाम
सुरत्वमितिविज्ञायते ॥ ऊर्जादउतयज्ञियासः ॥ अन्नादाश्चयज्ञियाश्चो
र्ज्यन्ननामोर्जयतीतिसतःपक्वंसुप्रक्ष्णामितिवा ॥ पंचजनाममहो ॥२६॥

वंजुषध्वं ॥ गंधर्वाःपितरोदेवाश्चासुरारक्षांसीत्येकेचत्वारोवर्णानिषादः
पंचमइत्योपमन्यवोनिषादःकस्मान्निषदनोप्सवतिनिषण्णमस्मि
न्पापकमितिनैरुक्ताः ॥ यत्पांचजन्ययाविशा ॥ पंचजनीनयाविशा
पंचपक्त्यासंख्यास्त्रीपुंनपुंसकेष्वविशिष्टाबाहुनामान्युत्तराणिह्वा
दशबाहूकस्मात्प्रबाधतआप्स्यांकर्मण्यंगुलिनामान्युत्तराणिह्वा
विंशतिरंगुलयःकस्मादयंगमिन्योप्सवंतीतिवायंगालिंन्योप्सवंती
तिवायकारिण्योप्सवंतीतिवायसारिण्योप्सवंतीतिवांकनाप्सवंती
तिवांजनाप्सवंतीतिवापिवाप्स्यंचनादेवस्युस्तासामेषाप्सवति ॥ ८ ॥
दशाबानिप्योदशाकक्ष्यिप्योदशयोक्ष्णियोदशयोजनेभ्यः ॥ दशाभी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुष्योऽर्चतोजरेभ्योदशधुरोदशयुक्तावहद्भ्रः॥ अवनयोंगुलयो
सवंत्यवंतिकर्माणिकस्याःप्रकाशयंतिकर्माणियोक्काणियोजनानि
तिव्याख्यातमक्षीरावोप्यःश्रुवतेकर्मोणि॥दशधुरोदशयुक्तावह
द्भ्रः॥धूर्धूर्वतेर्नामकर्मणोयमपीतराधूरेतस्मादविहंतिवहंधार
यतेवीकांतिकर्माणउत्तरेधातवोदशोन्ननोन्युत्तराण्यष्टाविंश म।५
तिरन्नंकस्मादानतंप्रतेप्योत्तिवांत्तिकर्माणउत्तरेधातवोदशबल
नामान्युत्तराण्यष्टाविंशतिर्बलंकस्माद्बलंभरंसवतिबिभर्तेर्धन ॥२७॥
नामान्युत्तराण्यष्टाविंशतिरेवधनंकस्माद्धिनोतीतिसतोगोना
मान्युत्तराणिनवक्रुध्यतिकर्माणउत्तरेधातवोदशक्रोधनामान्युत्तराण्ये

कादशगतिकर्मोणउत्तरेधातवोद्वाविंशंशतंक्षिप्रनामान्युत्तराणिष
ड्विंशतिःक्षिप्रंकस्मात्संक्षिप्तोविकर्षतिकनामान्युत्तराण्येकादश॥
तिकंकस्मादानीतंप्रवतिसंग्रामनामान्युत्तराणिषट्चत्वारिंशत्सं
ग्रामःकस्मात्संगमनाद्वासंगरणाद्वासंगतोयामाविंतिवात्तत्रखल
इत्येतस्यनिगमाभवंति॥९॥ अस्मीदमेकमेकोऽस्मिन्निःषाढ
क्षीद्वाकिमुत्रयःकरंति॥खलेनपूर्षान्प्रतिहन्मिक्षरिकिमानिदंति
शत्रवोनिद्राः॥अभिक्षवामीदमेकमेकोस्मिन्निःषहमाणःसपत्ना
नभिक्षवामिद्वौकिंमात्रयःकुर्वंत्येकइतासंख्याद्वौदुतनरासंख्यात्र
यस्तीर्णतमासंख्याश्चत्वारश्चलितनमासंख्याश्चावश्योत्तिर्नवनवन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीयानानाभावादश्वादस्त्रादक्षार्थावाविंशतिर्द्विर्दशतःशतंदशाद
शतःसहस्रंसहस्रदयुतंनियुतंप्रयुतंतत्तदभ्यस्तसंबुद्धोमेघोभवत्य
र्णमंबुतद्धांबुदोबुमभ्रातीतिवोबुमद्भवतीतिवासयथामहान्बहु
र्भवतिवर्षस्तद्धिवार्बुदं॥खलेनपर्षोन्प्रतिहन्मिभूरि॥खलइवपर्षा
न्प्रतिहन्मिभूरिखलइतिसंग्रामनामखलतेर्वास्खलतेर्वायमधीतरः
खलएतस्मादेवसमासकंनोभवति॥किंमानिदंतिशत्रवोनिंद्याः॥
यइंनविदुरिंद्रोह्यहमस्म्यनिंद्राइतरइतिवाव्यासिकर्मणउक्त
रेधातवोदशतत्रेहनामनीआक्षाणआशुवानआपानआशुवा
नोवधकर्मणाऽत्तरेधातवश्चयस्त्रिंशत्तत्रक्रियातद्भ्येतद्धियातयतइतिवा
वियातयेतिवा॥आखंडलश्चद्रूयसे॥आखंडयितःखंडंखंडयतेस्त

किदित्यंतिकवधयोःसंसृष्टकर्मताऽयनीतिसतः॥ १० ॥त्वयाव
यंसुवधाब्रह्मणस्पतेस्याहोवसुमनुष्याददीमहि॥यानोदूरेन
किनोयाश्चरातयोऽस्मिंसंनिजंघ्नयाताञ्चनघ्नसः॥त्वयावयंसुव
र्धयित्राब्रह्मणस्पतेस्पृहणीयानिवस्यनिमनुष्येभ्यश्चाददीम
हियाश्वनोदूरेनकिनोयाश्चांतिकेरातयोदानकर्माणोवादान
प्रज्ञावाजंघ्नयताञ्चनघ्नसोमइतिरूपनामाघ्नोतीतिसनोविधु
त्तऽइवनीतिशाकपूणिःसाह्यवनाऽयनिदूराच्चदृश्यतेऽपिवदमं
तिकनामैवाक्षिभ्रतंस्यादूरेचित्संनकिदिवानिरोचसे॥दूरेपसं
नंतिकइवसंदृश्यसइतिवज्रेनामान्युत्तराण्यष्टादशवज्रःकस्माद्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्जयतीतिसतस्तत्रकुत्सइत्येतत्कंतनेऋषिःकुत्सोभवतिकर्तारंसो
मानामित्योपमन्यवोत्राप्यस्यवधकर्मैवभवतितत्सखइंद्रःशुष्णंज
घानित्येश्वर्यकर्माणउत्तरेधातवश्चत्वारईश्वरनामान्युत्तराणिच
त्वारितत्रनइत्येतत्सानतऐश्वर्येणनिवासनितमनेनैश्वर्यमितिवा
॥ ११ ॥ यत्रासुपर्णाअमृतस्यभागमनिमेषंविदथाभिस्वरंति
इनोविश्वस्यभुवनस्यगोपाःसमाधीरःपाकमत्राविवेशेतियत्रसुप
र्णोःसुपतनात्रआदित्यरश्मयोमृतस्यभागमुदकस्यानिमिषंतोवे
दनेनाभिस्वरंतीतिवाभिप्रयंतीतिवेश्वरःसर्वेषांप्राणानांगोपायि ॥२९॥
तादित्यःसमाधीरःपाकमत्राविवेशेतिधीरोधीमान्याकःपक्वव्योम

वतिविपक्वत्रज्ञआदित्यइत्यपनिषद्वर्णोभवतीत्याधिदैवतमथा
ध्यात्मंयत्रसुपर्णाःसुपतनानींद्रियाण्यमृतस्यभागंज्ञानंस्या
निमिषंतोवेदनेनाभिस्वरंतीतिवाभिप्रयंतीतिवेश्वरःसर्वेषामिं
द्रियाणांगोपायितात्मासमाधीरःपाकमत्राविवेशेतिधीरोधी
मान्याकःपक्वव्योमभवतिविपक्वत्रज्ञआत्मेत्यात्मगतिमाचष्टे॥
॥ १२ ॥ बहुनामान्युत्तराणिद्वादशबहुकस्मात्प्रभवतीतिसतोह
स्वनामान्युत्तराण्येकादशह्रस्वोहसतेर्महन्नामान्युत्तराणिपं
चविंशतिर्महान्कस्मान्मानेनान्यांजहातीतिशाकपूणिर्महं
नीयोभवतीतिवातत्रवक्ष्यिथविवक्षसइत्येतेवक्तेवोवहतेर्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साप्यासाद्दनामान्युत्तराणिद्वाविंशतिर्ग्रहाःकस्माद्दूढंनीतिस
तांपरिचरणकर्माणउत्तरेधातवोदशसुखनामान्युत्तराणिवि
शतिःसुरंकस्मात्सुहितंखेप्यःस्वंपुनःखनतेरूपनामान्युत्तर
णिषोळशारूपंरोचतेःप्रशस्यनामान्युत्तराणिदशप्रज्ञानामानु
त्तराण्येकादशसत्यनामान्युत्तराणिषट्सत्यंकस्मात्सत्सुता
यतेसत्प्रभवंभवतीतिवाषडुत्तराणिपदानिपश्यतिकर्माण
उत्तरेधातवश्चायतिप्रकृतीनिचनामान्याभिश्राणिनवोत्त
राणिपदानिसर्वपदसमाम्नायाथातउमायदनत्तत्सदृशमि ॥३०॥
गाय्यसदासांकर्मेज्यायसावागुणेनप्रख्याततमेनवाकनीयां

संवाप्रख्यानंवोपमिमीतेथापिकनीयसाज्यायांसं॥१३॥तनूत्व
जेवत्तस्करावनर्गूरशनाभिर्दशाभिरभ्यधीतां॥तनूसक्तनूत्यक्ता
वनर्गूवनगामिनावाग्निमंथनोबाहूतस्करास्यामुपमिमीतेतस्क
रस्तत्करोतीवतियत्यापकमितिनैरुक्तास्तनोतेर्वास्यात्संततकर्मा
सवत्यहरहरात्रकर्मावा॥रशनाभिर्दशभिरभ्यधीतां॥अभ्यधीतांसि
त्यभ्यधातांज्यायांस्तत्रगुणाभिप्रेतः॥१४॥कुहस्विद्दोषाकुहवस्तो
रश्विनाकुहाभिपित्वंकरतःकुहोषतुः॥कोवांशयुत्राविधवेवदेव
रंमर्यंनयोषाकृणुतेसधस्थआ॥केमिद्रात्रीभवथःकदह्वाकामि
नामिंकुरुथःकवसथःकौवांशयनेविधवेवदेवरंदेवरःकस्माद्दिती
योवरउच्यतेविधवाविधात्रकामवतिविधवनाद्वाविधावनाद्वेतिचर्म

शिरोऽपिवाधवइतिमनुष्यनामतद्योगाद्धिवादेवरोदीव्यतिकर्मामयो
मनुष्यो मरणधर्मायोवायौतेरकुरुतेसहस्थानथनिपाताःपुरस्तादेवव्या
ख्याताथथेतिकर्मोपमा।। यथावातोयथावनंयथासमुद्रएजति।।भ्राजंतो
अग्नयोयथा।।आत्मायक्ष्मस्यनश्यतिपुराजीवगृभोयथा।। आत्मातते
वीतेर्वापिवाक्षइवस्याद्यावह्याग्निभूतइति।।अग्निर्नयेभ्राजसारुक्मवक्ष
सः।।अग्निरिवयेमरुतोभ्राजमानारोचिष्करस्कभ्राजस्वंतोरुक्मवक्ष
सः॥ १५ ॥चतुरश्चिद्ददमानाद्बिभीयादानिधातोः।।नदुरुक्तायस्पृह
येत्।।चतुरोक्षांधारयतइतिघथाकितवाद्बिभीयादेवमेवदुरुक्ताद्बिभी
यान्नदुरुक्तायस्पृह्येत।। कदाचिदाहत्याकारउपसर्गःपुरस्तादेवव्या
ख्यातोथाप्युपमार्थेदृश्यते।।जारआभगं।।जारइवभगमादित्योरजा २१

रउच्यतेरात्रेर्जरयितासर्वंभासंतथापिनिगमोभवतिस्वसुजारःशृणोतु
नइद्युषसमस्यस्वसारमाहसाहचर्याद्धरणाद्वापित्वयंमनुष्यजा
रएवाभिप्रेतस्यात्स्त्रीभगस्तथास्याइजतेर्नेषइतिभूतोपमा।।मघोभूतो३
भियंनयः।।मेघामिक्षतेस्तथापइहःपश्यतेरग्निरितिरूपोपमा।।हिर
ण्यरूपःसहिरण्यसंदृगयांनपात्सेदुहिरण्यवर्णः।।हिरण्यवर्णस्यरा
स्यरूपंथाइतिच ।।तंग्नथापूर्वथाविश्वथेमथा।।ग्नइवपूर्वइवेवि
श्वइवेमइवेत्ययमेतरेतेमुष्मादसावस्ततरोस्मादमुथायथासाविति
व्याख्यातंवदितिसिद्धोपमा।। ब्राह्मणवद्वृषलवत्।।ब्राह्मणाइवदृष
लाइवेतिवृषलोवृषद्यलोभवतिवृषाद्यलोवा॥ १६ ॥प्रियमेधवदत्रि
वज्जातवेदोविरूपवत्।।अंगिरस्वन्महिव्रतमस्कण्वस्यश्रुधीहवं।।प्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नि.पृ.३ ॥३२॥ युमेधांत्रिया अस्यमेधायस्यैतेषामृषीणामेवंमेधक्रव्यवस्यश्रुष्कानंग्रक्क
व्वःकण्वस्यपुत्रःकण्वप्रभवोयथाग्नायमर्चिषिरगुःसंबभूवभरगु
र्भृज्यमानोनदेहेंगारेषंगिराअंगाराअंकनाअंचनाअत्रेवृतीयमृ
क्षतेलूचुस्तस्मादृत्रिर्नत्रयइतिविखननाद्वेखानसोभरणाद्भारद्वाजो
विरूपोनानारूपोमहिव्रतोमहाव्रतइति ॥२७॥अथलुप्तोपमान्यर्थो
पमानीत्याचक्षतेसिंहोव्याघ्रइतियूजायांश्वाकाकइतिकुत्सायांका
कइतिशब्दानुकृतिलिंगादंशकुनिर्बबरुर्लेनशब्दानुकृतिर्विधतइत्यौ
पमन्यवःकाकोपकालुथितव्योभवतितित्तिरिस्तरणात्तिलमात्रचित्रइति
वाकपिंजलःकपिरिवजीर्णःकपिरिवजवतइषत्पिंगलोवाकमनीयंशब्द
पिंजयतीतिवाश्वाशुयायीशावतेवोस्याद्गतिकर्मणःश्वसितेवासिंहःस ॥३२॥

हनात्सिंसेवास्याद्विपरीतस्यसंपूर्वस्यवाहंतेःसंहायहंतीतिवाव्याघ्रोव्याघ्रा
णाघ्रादायहंतीतिवा ॥२८॥अर्चतिकर्माणउत्तरेधातवश्चतुश्चत्वारि
शन्मेधाविनामान्युत्तराणिचतुर्विंशतिर्मेधावीकस्मान्मेधयातद्धा
भवतिमेधामतोधीयतेस्तोत्रनामान्युत्तराणित्रयोदशस्तोतास्तव
नाद्यज्ञनामान्युत्तराणिपंचदशयज्ञःकस्मात्प्रख्यातंयजतिकर्मतिने
रुक्तायाज्वाभवतीतिवायजुर्नामभवतीतिवाबहुरूपस्त्रीजिनइत्यौप
मन्यवोयज्ञंध्वनंनयंतीतिवर्त्विङ्नामान्युत्तराण्यष्टादृतिक्कस्मादृ
त्विग्यष्टाभवतीतिशाकपूणिस्तुयाज्ञीभवतीतिवायाज्याकर्मण
उत्तरेधातवःसप्तदशदानकर्मणउत्तरेधातवोदशाध्येषणाकर्म
णउत्तरेधातवश्चत्वारःक्षपितिसर्त्तीतिढौक्षपितिकर्मणोकू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पनामान्युत्तराणि चत्वारि ३ । कूपः कस्मात् कुपानं भवति कुप्यते वास्तेन नामा
न्युत्तराणि चत्वारि ४ वास्तेनः कस्मात् संस्थानमस्मिन्नापद्यत इति निरुक्तं
निर्णीतं तर्हि तन्नामधेयान्युत्तराणि षण्णिर्णीतं कस्मान्निर्णीतं भवति
दूरनामान्युत्तराणि पंच दूरं कस्मात् दुतं भवति दुरयं वा पुराण नामान्युत्तरा
णि षट् पुराणं कस्मात् पुरा नवं भवति नवनामान्युत्तराणि षळेवनवं कस्मा
दानीतं भवति ॥ १० ॥ इदमुत्तराणि नामानि प्रपित्वेभीक इत्यासन्नस्य
प्रपित्वेत्राप्तेभीकेभ्यः कः ॥ आपित्वेनः प्रपित्वेतृयमाग हि ॥ अभीकोचि
दुलोक इत्यपि निगमो भवतो दभ्र मभ्रकमित्यल्पस्य दभ्रं दभ्नोतेः
स्तृदंभक्षवत्यभ्रकमवहतं भवति ॥ उपोपमेपरामृशामा मे दभ्राणि
मन्यथाः ॥ नमो महद्भ्यो नमोअभ्रकेभ्य इत्यपि निगमो भवतोत्तिरः ॥ ३२ ॥

सत इति प्राप्तस्य तिरस्तीर्णं भवति सतः संस्तृतं भवति ॥ तिरश्चिद्
र्यया परिवर्तियांत मदाभ्या ॥ पात्रेवभिं दन्त सतः तिरश्चीसइत्यपि
निगमो भवतस्त्वानेमइत्यर्धस्यैवापतितो नेमो पनीतो धंहरतेर्वि
परीताधारयतेर्वास्याद्धृतं भवत्यृभोतेर्वास्याद्दृश्यतेमो विभागः ॥
पीयतित्वोअनुत्वोगृणालि ॥ नेमेदेवानेमासुरइत्यपि निग
मो भवत नक्षास्त्वभिरिति नक्षत्राणां नक्षत्राणि नक्षतेर्गति
कर्मणानेमानि क्षत्राणीति च ब्राह्मणा नक्षाउदीर्णानीवख्या
यंतेस्त्रिभिस्तीर्णानीवख्यायंते ॥ अमीयन्नक्षत्राणि हितासउच्चा ॥
पश्यंतोद्यामिवस्तृभिरित्यपि निगमो भवतो वर्त्मभिरुपजिघ्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काइतिस्त्रीमिकानांनम्योवमनात्स्त्रीमिकास्यमनाडुपजिङ्किकाउप
जिघ्रः॥ वल्मीभिःपुत्रमयुवोअदानं॥ यदयुपजिङ्किकायदस्मो
अतिसर्पतीत्यपिनिगमोभवत्ईदरंछदरमित्यावपनस्योदरमुद्दी
र्णंभवत्यूर्जादीर्णंवा॥तमूदरंनयूणतायवेनेत्यपिनिगमोभवतित
मूदरमिवपूरयतियवेनकूदरंकृतदरंभवति॥समिथोअंजन्कू
दरंमतीनामित्यपिनिगमोभवति॥२०॥रंभःपिनाकमितिदंडस्य॥
रंभआरभंतएनं॥आत्वारंभंनजिघ्रयोरभेत्यपिनिगमोभव
त्यारभामहेखाजीर्णाइवदंडंपिनाकंप्रतिपिनष्ट्येनेनकृत्तिवासाः
पिनाकहस्तोवलतधन्वेत्यपिनिगमोभवतिमेनाग्नाइतिस्त्रीणां॥२८॥

स्त्रियस्त्यायतेरपत्रपयाकर्मणोमिनामानयंत्येनाग्नागछंत्येनाः॥अ
मेनांश्चिज्जनिवतश्चकर्थ॥ग्नास्त्वाकृतंनपसोतन्वतेनेत्यपिनिग
मोभवतःशेपोवैतसइतिपुंस्त्वजननस्यशेपःशयतेस्पृशतिकर्म
णोवैतसोमितस्तंभवति॥यस्यामुहूर्तःप्रहरामशेपे॥त्रिःस्मभा
कृश्वथयोवैतसेनेत्यपिनिगमोभवतीयेनेत्युपदेशस्य॥अया
तेअग्नेसमिधाविधेमेतिस्त्रियाः॥एनावोअग्निमितिनपुंसक
स्य॥एनापत्यातन्वंसंसृजस्वेतिपुंसः॥सिषक्तुसचतइतिसेवमान
स्य॥सनःसिषक्तुयस्तुरः॥सनःसेवतांयस्तुरः॥सचःस्वनःस्व
स्तये॥सेवस्वनःस्वस्तये॥स्वस्तीत्यविनाशिनामास्तिरभिपूजितः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वस्तीति श्यसतेरजतेरतिभयवेपनयोः ॥ यस्य शुष्मा द्यावापृथिवी अभ्यसेतां ॥
रजतेऽग्नेः पृथिवीमरंस्यदुत्पिनिगमो भवतो द्यावापृथिवीनामधेयान्यु
त्तराणि च नुर्विज्ञातिस्तयोरेषा भवति ॥ २१ ॥ कतरापूर्वाकतरापरायोः कथा
जाते कवयः काविवेद ॥ विश्वंमनाबिभृतो यद्धनामविवर्तेतअहनीचक्रि
येव ॥ कतरापूर्वाकतरापरेनयोः कथंजातेकवयः कएनोविजानाति
सर्वमात्मनाबिभृतो यद्धनयोः कर्मविवर्तेतेचेनयोरहनीअहोरात्रेचक्रु
क्तेइवेतिद्यावापृथिव्योर्महिमानमाचष्टेआचष्टे ॥ २२ ॥ कर्मनामानि
परिषद्यंनहियभायद्यासठक्रिरभातवनजामयेमनुष्यनामानितदध
दृश्रावनिभ्योभीदंतयावयंयत्राहुपथ्यो बकुनासानितन्नयजेवकुरुत्विच्च
तुरश्चिस्रियमेधवदथर्वणोपमान्यर्चतिऋग्भिरेतरापूर्वोहाविंशतिः ॥ २३ ॥
इति निरुक्ते पूर्वषट्के तृतीयोध्यायः समाप्तः ॥ ॥ श्रीरस्तु ॥ ॥

ॐ मूः ॥ एकार्थमनेकशब्दमित्येतदुक्तमथयान्येनकार्थान्येकशब्दा
नितान्यनानुक्रमिष्यामोनवुगतसंस्काराश्चानिगमास्तेदकपादक
मित्याचक्षतेजहाजघानेत्यर्थः ॥ १ ॥ कोनुमर्याआमिथितःसखासु
खायमब्रवीत् ॥ जहाकोअस्मदीषते ॥ मर्यादइतिमनुष्यनाममया
दाभिध्यानंवास्यान्मर्यादामेर्यादीयतेमर्य्यादामर्यादनोर्विसर्गोमि
थतिरक्रोशकर्मोपापकंजघानकमहंजातुकोस्मद्गीतःपलायतेनि
ध्यापाश्यास्रवतियंन्निधीयतेपाश्यापाशसमूहःपाशःपाश्यतेर्विपाश
नात् ॥ २ ॥ वयःसुपर्णाउपसेदुरिंद्रंप्रियमेधाऋषयोनाधमानाः ॥
अपध्वांतमूर्णुहिपूर्धिचक्षुर्मुग्ध्यस्मान्निधयेवबर्हान् ॥ वयोवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बंधुवचनंसुपर्णोःसुपतनाऽऽदित्यरश्मयउपसेदुरिंद्रंयाचमानाऽत्र
पार्ष्ण्याध्वस्तंचक्षुश्चक्षुःरव्यतेर्वाचक्षेर्वापूर्धिपूरयेदहीतिवामुंचा
स्मान्याशेरिवबध्यान्याश्वेतःश्रोणितःशितामतःपार्श्वंपर्शेमयमंगंभ
वतिपर्शुस्पृशेतेःसंस्पृष्टापरुदंशंपरुछंस्पृशतेःसंस्पृष्टमंगैरंगमेग
नादंचनाद्धश्रोणिःश्रोणतेर्गतिचलाकर्मणःश्रोणिश्चलतीवगच्छ
तीदोःशितामसवतिदोर्द्रवतेर्योनिःशितामीतिशाकपूणिर्विवेता
सवतिश्यामतायकृत्तइतिनेटीकिःश्यामंश्यायतेर्यकृच्छ्यथाकथा
चकृत्यतेशितिमांसतोमेदस्तइतिगालवःशितिःश्यतेर्मांसंमाननं
वामानसेवामनोस्मिन्त्सीदतीतिवामेदोमेधतेः ३ यदिंद्रचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=06.08.19 16:11
,TRANSFERRED=2019/08/06 at 16:21:53
,PAGES=38
,TYPE=STD
,NAME=S0001339
,Book Name=M-169-NIRUKT PURVSHTK MSS
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection